नन्दिक: ११. नन्दिवृक्षक: १२। इति शब्द-रत्नावली ॥*॥ मेषशृङ्गीवृच:। इति रत्नमाला ॥ स्थालीवृच:। इति भावप्रकाश: ॥

नन्दीश:, पुं, ( नन्दी ईशश्च। ) नन्दी। इति हेम-चन्द्र: ।२।१२४॥ भरतोक्ततालप्रभेद:। यथा,—
"सिंहनन्दननन्दीशचन्द्रबिम्बद्वितीयका: ॥"
तस्य लचणं यथा,—
"गो लघुर्गौलघु: प्लुतस्ताले नन्दीश्वरे मता:।"
इति सङ्गीतदामोदर: ॥
( नन्दिनो नन्दिगणस्य ईश:। इति विग्रहे शिव: ॥ )

नन्दीश्वर:, पुं, ( नन्दिनो गणविशेषस्य ईश्वर:। ) शिव:। इति शब्दरत्नावली ॥ नन्दीशताल:। इति सङ्गीतदामोदर: ॥ ( नन्दी ईश्वरश्च। ) शिवद्वारपाल:। तस्य शिवपार्षदत्वकारणं यथा,—
"ततस्त्रेतायुगे काले नन्दी नाम महामुनि:।
आरिराधयिषु: शर्व्वं तपस्तेपे सुदारुणम् ॥
ततस्तु भगवान् प्रीतस्तस्मै विप्राय शङ्कर:।
उवाच च वच: साचात्तन्दर्षिं वरद: प्रभु: ॥
वरान् वृणीष्व विप्रेन्द्र ! यानिच्छसि महामुने !।
तांस्ते सर्व्वान् प्रयच्छामि दुर्लभानपि मारिष ॥
इत्युक्तोऽसौ भगवता शर्व्वेण मुनिपुङ्गव।
प्रोवाच वरदं देवं प्रहृष्टेनान्तरात्मना ॥
यदि प्रीतोऽसि भगवन् ! अनुक्रोशतया मम।
अनुग्राह्यो ह्यहं देव त्वयावश्यं सुराधिप ! ॥
यथा नान्ये भवेद्भक्तिस्त्वयि नित्यं महेश्वर !।
तथाहं भक्तिमिच्छामि सर्व्वभूताशये त्वयि ॥
एतत्तु वचनं श्रुत्वा नन्दिन: स महेश्वर:।
प्रहस्योवाच तं प्रीत्या ततो मधुरया गिरा ॥
मद्रूपधारी मत्तेजास्त्वञ्च सर्व्वगुणोत्तम:।
भविष्यसि न सन्देहो देवदानवपूजित: ॥
अनेनैव शरीरेण जरामरणवर्ज्जित:।
दुष्प्राप्यमवाप्स्यसि देवैर्गाणेश्वरी गति: ॥
पार्षदानां वरिष्ठश्च मामकानां द्विजोत्तम !।
नन्दीश्वर इति ख्यातो भविष्यसि न संशय: ॥
अद्यप्रभृति देवाग्र्य ! देवकार्य्येषु सर्व्वत:।
त्वं प्रभुर्भविता लोके मत्प्रसादान्मुनीश्वर ! ॥
त्वामेवाभ्यर्च्चयिष्यन्ति सर्व्वभूतानि सर्व्वत:।
मत्त: समभिवाञ्छन्त: प्रसादं पार्षदाधिप ! ॥
यस्त्वां द्वेष्टि स मां द्वेष्टि यस्त्वामनु स मामनु।
नावयोरन्तरं किञ्चिदम्बरानिलयोरिव ॥
द्वारे तु दचिणे नित्यं त्वया स्थेयं गणाधिप !।
वामेन विभुना वापि महाकालेन सर्व्वदा ॥"
इति वराहपुराणम् ॥

नन्दीसर:, [ स् ] क्ली, ( नन्द + इन् + वा ङीष्। नन्द्यै आनन्दार्थं यत् सर:। ) इन्द्रसरोवर:। इति शब्दमाला ॥

नन्द्यावर्त्त:, पुं, ( नन्दिजनक आवर्त्तो यत्र। ) ईश्वरसद्मविशेष:। इत्यमर: ।२।२।१०॥ तस्य लचणं यथा,—
"दचिणावृतालिन्दचयं यत् पश्चिमामुखम्।
पूजनीयोत्तरच्छायं नन्द्यावर्त्तं वदन्ति तत् ॥"
इति भरतधृतसाङ्ग: ॥
तगरद्रुम:। इति विश्व: ॥ मत्स्यभेद:। तस्य गुणा:। संग्राहित्वम्। कफपित्तविनाशित्वञ्च। इति राजवल्लभ: ॥

नपुंसकं, क्ली, ( न स्त्री न पुमान्। "नभ्राण्नपा-दिति।" ६।३।७५। इति निपातनात् स्त्रीपुंसयो: पुंसक-आदेश:।) क्लीवम्। इत्यमर:। २।६।३८ ॥ हिजिड़ा इति भाषा ॥ तस्य कारणं यथा,—
"उभयोर्ब्बीजसामान्ये जायते वै नपुंसकम् ॥"
इति सुखबोध: ॥ * ॥
( नपुंसको भवेदिति भाष्यप्रयोगात् पुंलिङ्गोऽपि भवति। तथा, च पञ्चतन्त्रे। १।३६४।
"परदेशभयाद्भीता बहुमाया नपुंसका:।
स्वदेशे निधनं यान्ति काका: कापुरुषा मृगा: ॥" )
नपुंसकगर्भस्य चिह्नं यथा,—
"नपुंसकं यदा गर्भो भवेद्गर्भोऽर्वुदाकृति:।
उन्नते भवत: पार्श्वे पुरस्तदुदरं महत् ॥"*॥
नपुंसकविशेषानाह।
"आसेक्यश्च सुगन्धिश्च कुम्भीकश्चेर्षकस्तथा।
अमी सशुक्रा बोद्धव्या अशुक्रो भूणसंज्ञक: ॥"
तेषां लचणान्याह।
"पित्रोस्तु स्वल्पवीर्य्यत्वादासेक्य: पुरुषो भवेत्।
स शुक्रं प्राश्य लभते ध्वजोन्नतिमसंशयम् ॥
य: पूतियोनौ जायेत स हि सौगन्धिको भवेत्।
स गुदेऽब्रह्मचर्य्याद्य: स्त्रीषु पुंवत् प्रवर्त्तते।
स कुम्भीक इति ज्ञेयो गुदयोनिस्तु स स्मृत: ॥
दृष्ट्वा व्यवायमन्येषां व्यवाये य: प्रवर्त्तते।
ईर्षक: स तु विज्ञेयो दृष्टियोनिश्च स स्मृत: ॥
यो भार्य्यायामृतौ मोहादङ्गनेव प्रवर्त्तते।
तत्र स्त्रीचेष्टिताकारो जायते षण्डसंज्ञक: ॥"
इति भावप्रकाश: ॥
( अस्य विवृतिर्यथा,—
"समवीर्य्यरजस्त्वेन नर: स्त्रीप्रकृतिर्भवेत्।
नपुंसकमिति ख्यातं न स्त्री न पुरुषो वदेत् ॥"
"समदोषबलेनापि प्रकृत्या विकृतेरपि।
समो भवेद्यदा शुक्रो नपुंसकसमुद्भव: ॥"
इति हारीते शारीरस्थाने प्रथमेऽध्याये ॥)

नप्ता, [ ऋ ] पुं, (न पतन्ति पितरो येनेति। पत + "नप्तृनेष्टृत्वष्टृेति।" उणां २। ६६। इति तृन्प्रत्ययेन निपातनात् साधु:। ) पुत्त्रकन्ययो: पुत्त्र:। नाति इति भाषा। तत्पर्य्याय:। पौत्त्र: २ सुतस्य सुत: ३। इति हेमचन्द्र: ॥ ( यथा, महाभारते। १। ८५। २०।
"कथं शुक्रस्य नप्तारं देवयान्या: सुतं प्रभो !।
ज्येष्ठं यदुमतिक्रम्य राज्यं पूरो: प्रदास्यसि ॥" )

नप्त्री, स्त्री, (नप्तृ + "ऋन्नेभ्यो ङीप्।" ४।१।५। इति ङीप्। ) पुत्त्रकन्ययो: पुत्त्री। नातिनी इति भाषा। तत्पर्य्याय:। पौत्त्री २ सुतात्मजा ३। इत्यमर:। २।६।२८ ॥ नप्ता ४ पौत्त्रिका ५। इति रभस: ॥ सुतस्य सुतायाश्चात्मजायां नप्त्री पुत्त्रस्य पुत्त्राणाञ्चापत्यं पौत्त्री अतएव पौत्त्रोऽपि नप्ता। इत्यमरटीकायां भरत: ॥

नभ:, पुं, ( नभति हिनस्ति कीटादीनिति। नभ हिंसायाम् + पचाद्यच्। ) श्रावणमास:। इति शब्दरत्नावली ॥ ( द्वितीयमनो: स्वारोचिषस्य पुत्त्रविशेष:। इति हरिवंशे। ७।१४॥ तृतीय-मन्वन्तरदेवविशेष:। इति च तत्रैव। ७।१८॥ कुशप्रपौत्त्रनलस्य पुत्त्र:। इति च हरिवंशे। १५।२७॥ )

नभ:, [स्] क्ली, (नह्यते मेघैरिति। णह बन्धने + "नहेर्दिवि भश्च।" उणां ४।२१०। इति असुन् भश्चान्तादेश:। ) आकाशम्। इत्यमर:। १। २।१॥ ( यथा, मनु:। ४।३७।
"नेचेतोद्यन्तमादित्यं नास्तं यान्तं कदाचन।
नोपसृष्टं न वारिस्थं न मध्यं नभसो गतम् ॥")

नभ:क्रान्ती, [ न् ] पुं, ( नभ:क्रान्तं गगनाक्रमण-मस्त्यस्येति। इनि:। ) सिंह:। इति शब्द-माला ॥

नभ:प्राण:, पुं, ( नभस: प्राण इव। ) पवन:। इति त्रिकाण्डशेष: ॥

नभ:सत्, [ द् ] पुं, ( नभसि सीदतीति। सद् + क्विप्। ) देव:। इति त्रिकाण्डशेष: ॥

नभ:सरित्, स्त्री, ( नभस: सरित् नदी। ) स्वर्गङ्गा। इति त्रिकाण्डशेष: ॥

नभ:स्थित:, पुं, ( नभसि स्थित:। ) नरकविशेष:। इति हेमचन्द्र:। ५।२ ॥ आकाशस्थिते, त्रि ॥

नभश्चचु:, पुं, ( नभसश्चचुरिव। ) सूर्य्य:। इति शब्दमाला ॥

नभश्चमस:, पुं, ( नभसश्चमस इव। ) चन्द्र:। चित्रापूप:। इन्द्रजालम्। इति मेदिनी। से, ३८ ॥

नभश्चर:, पुं, ( नभसि चरतीति। चर + ट:। ) पची। विद्याधर:। ( गन्धर्व्वादि:। यथा, रघु:। १८। ६।
"नभश्चरैर्गीतयशा: स लेभे
नभस्तलश्यामतनुं तनूजम् ॥" )
मेघ:। वायु:। इति मेदिनी। रे, २७२ ॥
( आकाशचारिणि, त्रि। यथा, कुमारे। ५। २३।
"निकामतप्ता विविधेन वह्निना
नभश्चरेणेन्धनसम्भृतेन सा ॥" )

नभसं, क्ली, (नभते व्याप्नोतीति। नभ + "अत्यवि-चमितमीति।" उणां। ३। ११७। इति असच्। ) आकाशम्। यथा। नभसं खं मेघ-वर्त्म विहायसमिति निगम: ॥ ( पुं, दशम-मन्वन्तरीयसप्तर्षीणामन्यतम:। यथा, हरि-वंशे। ७। ६७।
"अङ्गिरा नभस: सत्यं सप्तैव परमर्षय: ॥" )

नभसङ्गम:, पुं, ( नभसं गच्छतीति। गम + गमे: सुपीति खच्। ततो मुम्। ) पची। इत्यमर:। २।४।३४ ॥